२३

246sk23

कारकविभक्तौ पञ्चमी षष्ठी सप्तमी च।

प्रस्तावना

संस्कृतभाषायाम् तावत् षट् कारकाणि सन्ति। कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणं चेति। तत्र इतः पूर्वोक्तेषु पाठेषु कर्मकारकविषये कर्तृकारकविषये करणकारकविषये सम्प्रदानकारकविषये च पठितम्। अस्मिन् पाठे अपादानविषये विवेचनं क्रियते। पुनः अपादाने का विभक्तिः भवति इति अत्र पाठे प्रस्तूयते।

कारकप्रकरणस्य आदितः पञ्चमीविभक्तिं यावत् पूर्वपाठेषु अनभिहिते कर्तरि तृतीया विभक्तिः भवति इति पठितम्। अनभिहिते कर्मणि च द्वितीया विभक्तिः भवति इति च पठितम्। किन्तु अनभिहिते कर्तरि कर्मणि च षष्ठी विभक्तिः अपि भवति। केन सूत्रेण कर्तरि कर्मणि च षष्ठी विभक्तिः भवति, कदा च भवति इति अस्मिन् पाठे प्रस्तूयते। तत्र कर्तरि कर्मणि षष्ठीविधायकानि अनेकसूत्राणि सन्ति। तेषु कर्तृकर्मणोः कृति, उभयप्राप्तौ कर्मणि, कृत्यानां कर्तरि वा इति त्रीणि सूत्राणि एव मुख्यानि सन्ति। अतः तेषाम् अत्र व्याख्यानं प्रस्तूयते। किञ्च कर्तृकर्मणोः कृति इति सूत्रस्य निषेधकं न लोकाव्ययनिष्ठाखलर्थतृनाम् इति सूत्रमपि वर्तते। तस्यापि ज्ञानं कारकषष्ठीविभक्तेः प्रयोगाय आवश्यकम् अस्ति इत्यतः एतस्य सूत्रस्य अपि अत्र व्याख्या प्रस्तूयते।

अस्मिन् पाठे अधिकरणकारकविषये विवेचनमपि प्रस्तूयते। एवञ्च अधिकरणे च का विभक्तिः भवति इति प्रस्तूयते।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- ➢ अपादानसंज्ञा कस्य भवति इति बोद्धुं शक्नुयात्।
- ➢ वाक्यरचनाकाले अपादानस्य पञ्चम्याः च सम्यग् व्यवहारं कर्तुम् पारयेद्।
- ➢ कारकषष्ठीविधायकसूत्राणि ज्ञास्यति।
- ➢ न लोकाव्ययनिष्ठाखलर्थतृनां सूत्रस्य अर्थं ज्ञातुं प्रभवेत्।
- ➢ कारकषष्ठीविभक्तेः वाक्येषु शुद्धप्रयोगं कर्तुं शक्नुयात्।
- ➢ द्विकर्मकधातुघटितवाक्येषु कारकषष्ठीप्रयोगस्य प्रयोगं कर्तुं प्रभवेत्।
- ➢ अधिकरणसंज्ञा कस्य भवति इति बोद्धुं शक्नुयात्।

- वाक्येषु किम् अपादानकारकम् , किम् अधिकरणकारकम् इति ज्ञातुं प्रभवेत्।
- वाक्येषु कुत्र कारकषष्ठी भवतीति जानीयात्।
- वाक्यरचनाकाले अधिकरणस्य सप्तम्याः च सम्यग् व्यवहारं कर्तुं पारयेत्।

अथ पञ्चमी कारकविभक्तिः

[२३.१] ध्रुवमपायेऽपादानम्॥ (१.४.२४)

सूत्रार्थः - विभागे सति यः धात्ववाच्यविभागाश्रयः सः कारकसंज्ञः सन् अपादानसंज्ञः भवति।

सूत्रावतरणम् - संस्कृतभाषायाम् तावत् षट् कारकाणि सन्ति। कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणं चेति। एतेषु अपादानं किं भवति इति प्रतिपादयितुं ध्रुवमपायेऽपादानम् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदम् संज्ञासूत्रम्। इदं सूत्रं कारकसंज्ञाम् अपादानसंज्ञां च करोति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। ध्रुवम् इति प्रथमैकवचनान्तं पदम्। अपाये इति सप्तम्येकवचनान्तं पदम्। अपादानम् इति प्रथमैकवचनान्तं पदम्। कारकम् इति अधिकारः अत्र आगच्छति। अपाये ध्रुवम् कारकसंज्ञं सत् अपादानसंज्ञं भवति इति वाक्ययोजना। अत्र ध्रुवम् इत्यस्य धात्ववाच्यविभागाश्रयः इत्यर्थः। अपाये इत्यस्य विभागे सति इत्यर्थः। एवञ्च सूत्रार्थो भवति विभागे सति यः धात्ववाच्यविभागाश्रयः सः कारकसंज्ञः सन् अपादानसंज्ञः भवति।

उदाहरणम् - पत्रं वृक्षात् पतति। मैत्रः ग्रामात् गच्छति।

सूत्रार्थसमन्वयः -

पत्रं वृक्षात् पतति। अस्मिन् वाक्ये वृक्षः अपादानम् अस्ति। अतः तत्र सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र पत्रस्य पतनेन पत्रवृक्षयोः मध्ये विभागः जायमानः अस्ति। पत् इति धातोः अधःसंयोगानुकूलव्यापारः इत्यर्थः। अतः विभागः पत् इति धातोः वाच्यः नास्ति। एवञ्चात्र विभागे सति धात्ववाच्यस्य विभागस्य आश्रयः वृक्षः अस्ति। अतस्तस्य ध्रुवमपायेऽपादानम् इति सूत्रेण कारकसंज्ञा भूत्वा अपादानसंज्ञा च भवति।

मैत्रः ग्रामात् गच्छति। अस्मिन् वाक्ये ग्रामः अपादानम् अस्ति। अतः तत्र सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र मैत्रस्य गमनेन मैत्रग्रामयोः मध्ये विभागः जायमानः अस्ति। गम् -धातोः उत्तरदेशसंयोगानुकूलव्यापारः इत्यर्थः। अतः विभागः गम् इति धातोः वाच्यः नास्ति। एवञ्चात्र विभागे सति धात्ववाच्यस्य विभागस्य आश्रयः ग्रामः अस्ति। अतस्तस्य ध्रुवमपायेऽपादानम् इति सूत्रेण कारकसंज्ञा भूत्वा अपादानसंज्ञा च भवति।

[२३.२] भीत्रार्थानां भयहेतुः॥ (१.४.२५)

सूत्रार्थः - भयार्थकानां धातूनां प्रयोगे भयस्य कारणं कारकसंज्ञं सत् अपादानसंज्ञं भवति। एवं रक्षार्थकानां धातूनां प्रयोगे भयस्य कारणं कारकसंज्ञं सत् अपादानसंज्ञं भवति।

सूत्रव्याख्या - इदम् संज्ञासूत्रम्। इदं सूत्रं कारकसंज्ञाम् अपादानसंज्ञां च करोति। सूत्रेऽस्मिन् द्वे पदे स्तः। भीत्रार्थानाम् इति षष्ठीबहुवचनान्तं पदम्। भयहेतुः इति प्रथमैकवचनान्तं पदम्। अस्मिन् सूत्रे ध्रुवमपायेऽपादानम् इति सूत्रात् अपादानम् इति पदम् अनुवर्तते। कारकम् इति अधिकारः अत्र आगच्छति। भीत्रार्थानां भयहेतुः कारकसंज्ञः सन् अपादानसंज्ञः भवति इति वाक्ययोजना। अत्र भीत्रार्थानाम् इति पदे द्वन्द्वगर्भबहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति भीश्च त्राश्च इति भीत्रौ। भीत्रौ अर्थौ येषां ते भीत्रार्थाः। तेषां भीत्रार्थानाम्। एवञ्च भीत्रार्थानामिति पदस्यार्थो भवति भयार्थकानां धातूनाम्, रक्षार्थकानां च धातूनाम् इति। भयहेतुः इत्यत्र षष्ठीतत्पुरुषसमासः अस्ति। तस्य च विग्रहः भवति भयस्य हेतुः इति भयहेतुः। अत्र हेतुपदस्य कारणमित्यर्थः। एवञ्च भयहेतुपदस्यार्थो भवति भयकारणम् इति। प्रयोगे इत्यस्य अध्याहारः क्रियते। एवञ्च सूत्रार्थो भवति - भयार्थकानां धातूनां प्रयोगे भयस्य कारणं कारकसंज्ञं सत् अपादानसंज्ञं भवति। एवं रक्षार्थकानां धातूनां प्रयोगे भयस्य कारणं कारकसंज्ञं सत् अपादानसंज्ञं भवति।

भयार्थकाः धातवः - ञिभी भये - बिभेति। त्रसि उद्वेगे - त्रस्यति। ओविजी भयचलयोः, (प्रायेण उत् -पूर्वः अयम्) - उद्विजते। एवमन्येऽपि।

रक्षार्थका धातवः - रक्ष् पालने - रक्षति। त्रैङ् पालने - त्रायते। पा रक्षणे - पाति। पाल् रक्षणे - पालयति। एवमन्येऽपि।

उदाहरणम् - सर्पः नकुलात् बिभेति। माता बालं सर्पात् रक्षति।

सूत्रार्थसमन्वयः -

सर्पः नकुलात् बिभेति। अस्मिन् वाक्ये नकुलः अपादानम् अस्ति। अतः तत्र सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र वाक्ये भयार्थकस्य ञिभी भये इति धातोः प्रयोगः अस्ति। तत्र च भयस्य कारणम् अस्ति नकुलः। अतः भयकारणस्य नकुलस्य भीत्रार्थानां भयहेतुः इति सूत्रेण कारकसंज्ञा भूत्वा अपादानसंज्ञा भवति।

माता बालं सर्पात् रक्षति। अस्मिन् वाक्ये सर्पः अपादानम् अस्ति। अतः तत्र सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र वाक्ये रक्षार्थकस्य रक्ष इति धातोः प्रयोगः अस्ति। तत्र च भयस्य कारणम् अस्ति सर्पः। अतः भयकारणस्य सर्पस्य भीत्रार्थानां भयहेतुः इति सूत्रेण कारकसंज्ञा भूत्वा अपादानसंज्ञा भवति।

[२३.३] जनिकर्तुः प्रकृतिः॥ (१.४.३०)

सूत्रार्थः - जायमानस्य कारणं कारकसंज्ञं सत् अपादानसंज्ञं भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। इदं सूत्रं कारकसंज्ञाम् अपादानसंज्ञां च करोति। सूत्रेऽस्मिन् द्वे पदे स्तः। जनिकर्तुः इति षष्ठ्येकवचनान्तं पदम्। प्रकृतिः इति प्रथमैकवचनान्तं पदम्। अस्मिन् सूत्रे

ध्रुवमपायेऽपादानम् इति सूत्रात् अपादानम् इति पदम् अनुवर्तते। कारकम् इति अधिकारः अत्र आगच्छति। जनिकर्तुः प्रकृतिः कारकसंज्ञा सती अपादानसंज्ञा भवति इति वाक्ययोजना। तत्र जनिकर्तुः इति पदे षष्ठीतत्पुरुषसमासः अस्ति। तस्य च विग्रहः भवति जनेः कर्ता इति जनिकर्ता। तस्य जनिकर्तुः इति। एवञ्चास्य जायमानस्य इत्यर्थः भवति। प्रकृतिः इत्यस्य च कारणम् इत्यर्थः। एवञ्च सूत्रार्थो भवति - जायमानस्य कारणं कारकसंज्ञं सत् अपादानसंज्ञं भवति।

उदाहरणम् - ईश्वरात् जगत् जायते।

सूत्रार्थसमन्वयः -

ईश्वरात् जगत् जायते। अस्मिन् वाक्ये ईश्वरः अपादानम् अस्ति। अतः तत्र सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र जायमानम् अस्ति जगत्, तस्य च कारणम् अस्ति ईश्वरः। एवञ्च जायमानस्य जगतः कारणम् ईश्वरः अस्ति। अतः तस्य जनिकर्तुः प्रकृतिः इति सूत्रेण कारकसंज्ञा भूत्वा अपादानसंज्ञा भवति।

अन्यानि उदाहरणानि -

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।

यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।। (गीता)

सरलार्थः - अन्नाद् भूतानि (जीवाः) भवन्ति। पर्जन्याद् अन्नसम्भवः (अन्नं भवति)। यज्ञाद् पर्जन्यः भवति। यज्ञः कर्मसमुद्भवः (कर्मणः यज्ञः भवति)

[२३.४] आख्यातोपयोगे॥ (१.४.२९)

सूत्रार्थः - नियमपूर्वकविद्यास्वीकारे गम्यमाने वक्ता कारकसंज्ञः सन् अपादानसंज्ञः भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। इदं सूत्रं कारकसंज्ञाम् अपादानसंज्ञां च करोति। सूत्रेऽस्मिन् द्वे पदे स्तः। आख्याता इति प्रथमैकवचनान्तं पदम्। उपयोगे इति सप्तम्येकवचनान्तं पदम्। अस्मिन् सूत्रे ध्रुवमपायेऽपादानम् इति सूत्रात् अपादानम् इति पदम् अनुवर्तते। कारके इति अधिकारः अत्र आगच्छति। तस्य च कारकम् इत्यर्थः। उपयोगे आख्याता कारकसंज्ञः सन् अपादानसंज्ञः भवति इति वाक्ययोजना। अत्र आख्याता इति पदस्य वक्ता इत्यर्थः। उपयोगे इत्यस्य च नियमपूर्वकविद्यास्वीकारे इत्यर्थः। गम्यमाने इति पदस्य चात्र अध्याहारः क्रियते। एवञ्च सूत्रार्थो भवति नियमपूर्वकविद्यास्वीकारे गम्यमाने वक्ता कारकसंज्ञः सन् अपादानसंज्ञः भवति।

उदाहरणम् - माणवकः गुरोः वेदं पठति।

सूत्रार्थसमन्वयः -

माणवकः गुरोः वेदं पठति। अस्मिन् वाक्ये गुरुः अपादानम् अस्ति। अतः तत्र सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र नियमपूर्वकविद्यास्वीकारः गम्यमानः अस्ति। यतोहि वेदस्य पाठः नियमानुसारमेव भवति। तस्मिन् नियमपूर्वकविद्यास्वीकारे गम्यमाने वक्ता अस्ति गुरुः। अतः तस्य गुरोः

आख्यातोपयोगे इति सूत्रेण कारकसंज्ञा भूत्वा अपादानसंज्ञा भवति। इदमपि अत्र अवधेयं यद् नियमरहितविद्यास्वीकारेऽपि यो विद्यां ददाति तस्य अपादानसंज्ञा भवति। अतः अख्याता इति पदेन ज्ञानदाता बोध्यः।

[२३.५] अपादाने पञ्चमी॥ (२.३.२८)

सूत्रार्थः - अनुक्ते अपादाने पञ्चमी विभक्तिः भवति।

सूत्रावतरणम् - तत्र तावत् प्रथमा द्वितीया तृतीया चतुर्थी पञ्चमी षष्ठी सप्तमी इति एताः सप्त विभक्तयः सन्ति। तत्र एतासु मध्ये पञ्चमी कस्मिन् अर्थे भवति इति प्रतिपादयितुं अपादाने पञ्चमी इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं पञ्चमीं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। अपादाने इति सप्तम्येकवचनान्तं पदम्। पञ्चमी इति प्रथमैकवचनान्तं पदम्। अनभिहिते इति अधिकारः अत्र आगच्छति। अनभिहिते अपादाने पञ्चमी विभक्तिः भवति इति वाक्ययोजना। पञ्चमी इत्यस्य पञ्चमी विभक्तिः इत्यर्थः। अनभिहिते इत्यस्य अनुक्ते इत्यर्थः। तेन च सूत्रार्थः भवति अनुक्ते अपादाने पञ्चमी विभक्तिः भवति।

उदाहरणम् - पत्रं वृक्षात् पतति। मैत्रः ग्रामात् गच्छति। सर्पः नकुलात् बिभेति। माता बालं सर्पात् रक्षति। ईश्वरात् जगत् जायते। माणवकः गुरोः वेदं पठति।

सूत्रार्थसमन्वयः -

पत्रं वृक्षात् पतति। अस्मिन् वाक्ये वृक्षः अपादानम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अयं कर्तरि प्रयोगः वर्तते। कारणं लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण पत् -धातोः विवक्षातः कर्तरि लकारः विहितः अस्ति। तस्य स्थाने तिङ् अपि कर्तरि एव। इत्थं कर्तरि प्रयोगे च कर्ता उक्तः भवति, अपादानादिकम् च अनुक्तम् भवति। एवञ्च अनुक्ते अपादाने वृक्षे अपादाने पञ्चमी इति सूत्रेण पञ्चमी विभक्तिः भवति। अपि च उक्ते कर्तरि प्रथमा विभक्तिः भवति। तेन च पत्रं वृक्षात् पतति इति वाक्यं सिध्यति।

मैत्रः ग्रामात् गच्छति। अस्मिन् वाक्ये ग्रामः अपादानम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अयं कर्तरि प्रयोगः वर्तते। कारणं लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण गम् -धातोः विवक्षातः कर्तरि लकारः विहितः अस्ति। तस्य स्थाने तिङ् अपि कर्तरि एव। इत्थं कर्तरि प्रयोगे च कर्ता उक्तः भवति, अपादानादिकम् च अनुक्तम् भवति। एवञ्च अनुक्ते अपादाने ग्रामे अपादाने पञ्चमी इति सूत्रेण पञ्चमी विभक्तिः भवति। अपि च उक्ते कर्तरि प्रथमा विभक्तिः भवति। तेन च मैत्रः ग्रामात् गच्छति इति वाक्यं सिध्यति।

सर्पः नकुलात् बिभेति। अस्मिन् वाक्ये नकुलः अपादानम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अयं कर्तरि प्रयोगः वर्तते। कारणं लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण भी -धातोः विवक्षातः कर्तरि लकारः विहितः अस्ति। तस्य स्थाने तिङ् अपि कर्तरि एव। इत्थं कर्तरि प्रयोगे च कर्ता

उक्तः भवति, अपादानादिकम् च अनुक्तम् भवति। एवञ्च अनुक्ते अपादाने नकुले अपादाने पञ्चमी इति सूत्रेण पञ्चमी विभक्तिः भवति। अपि च उक्ते कर्तरि प्रथमा विभक्तिः भवति। तेन च सर्पः नकुलात् बिभेति इति वाक्यं सिध्यति।

माता बालं सर्पात् रक्षति। अस्मिन् वाक्ये सर्पः अपादानम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अयं कर्तरि प्रयोगः वर्तते। कारणं लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण रक्ष् -धातोः विवक्षातः कर्तरि लकारः विहितः अस्ति। तस्य स्थाने तिङ् अपि कर्तरि एव। इत्थं कर्तरि प्रयोगे च कर्ता उक्तः भवति, अपादानादिकम् च अनुक्तम् भवति। एवञ्च अनुक्ते अपादाने सर्पे अपादाने पञ्चमी इति सूत्रेण पञ्चमी विभक्तिः भवति। अपि च उक्ते कर्तरि प्रथमा विभक्तिः भवति। तेन च माता बालं सर्पात् रक्षति इति वाक्यं सिध्यति।

ईश्वरात् जगत् जायते। अस्मिन् वाक्ये ईश्वरः अपादानम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अयं कर्तरि प्रयोगः वर्तते। कारणं लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण जन् -धातोः विवक्षातः कर्तरि लकारः विहितः अस्ति। तस्य स्थाने तिङ् अपि कर्तरि एव। इत्थं कर्तरि प्रयोगे च कर्ता उक्तः भवति, अपादानादिकम् च अनुक्तम् भवति। एवञ्च अनुक्ते अपादाने ईश्वरे अपादाने पञ्चमी इति सूत्रेण पञ्चमी विभक्तिः भवति। अपि च उक्ते कर्तरि प्रथमा विभक्तिः भवति। तेन च ईश्वरात् जगत् जायते इति वाक्यं सिध्यति।

माणवकः गुरोः वेदं पठति। अस्मिन् वाक्ये गुरुः अपादानम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अयं कर्तरि प्रयोगः वर्तते। कारणं लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण पठ् -धातोः विवक्षातः कर्तरि लकारः विहितः अस्ति। तस्य स्थाने तिङ् अपि कर्तरि एव। इत्थं कर्तरि प्रयोगे च कर्ता उक्तः भवति, अपादानादिकम् च अनुक्तम् भवति। एवञ्च अनुक्ते अपादाने गुरौ अपादाने पञ्चमी इति सूत्रेण पञ्चमी विभक्तिः भवति। अपि च उक्ते कर्तरि प्रथमा विभक्तिः भवति। तेन च माणवकः गुरोः वेदं पठति इति वाक्यं सिध्यति।

पाठगतप्रश्नाः-१

अत्र केचन पाठगतप्रश्नाः प्रदीयन्ते।

१. ध्रुवमपायेऽपादानम् इति सूत्रे ध्रुवपदस्य कः अर्थः।

२. ध्रुवमपायेऽपादानम् इति सूत्रे अपायः कः।

३. ध्रुवमपायेऽपादानम् इति सूत्रेण किं विधीयते।

४. भीत्रार्थानां भयहेतुः इति सूत्रे भयहेतुः इति पदस्य कः अर्थः।

५. भयहेतुः इत्यत्र कः समासः।

६. जनिकर्तुः प्रकृतिः इति सूत्रे जनिकर्तुः इति पदस्य कः अर्थः।

७. जनिकर्तुः प्रकृतिः इति सूत्रे प्रकृतिः इति पदस्य कः अर्थः।

८. आख्यातोपयोगे इति सूत्रे आख्याता इति पदस्य कः अर्थः।

९. आख्यातोपयोगे इति सूत्रे उपयोगः कः।

अथ षष्ठी कारकविभक्तिः

[२३.६] कर्तृकर्मणोः कृति॥ (२.३.६५)

सूत्रार्थः - कृदन्तपदवाच्यक्रियायाः अनुक्ते कर्तरि षष्ठीविभक्तिः भवति। कृदन्तपदवाच्यक्रियायाः अनुक्ते कर्मणि षष्ठीविभक्तिः भवति।

सूत्रावतरणम् - कृष्णस्य कृतिः इत्यत्र कर्तरि षष्ठी विभक्तिः अस्ति। संसारस्य कर्ता कृष्णः इत्यत्र च कर्मणि षष्ठी विभक्तिः अस्ति। परन्तु केन सूत्रेण कर्तरि कर्मणि च षष्ठी विभक्तिः भवति इति जिज्ञासायां कर्तृकर्मणोः कृति इति सूत्रम् आगच्छति

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं षष्ठीं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। कर्तृकर्मणोः इति षष्ठीद्विवचनान्तं पदम्। कृति इति सप्तम्येकवचनान्तं पदम्। अस्मिन् सूत्रे शेषे षष्ठी इति सूत्रात् षष्ठी इति पदम् अनुवर्तते। अनभिहिते इति अधिकारः अत्र आगच्छति। कृद्योगे अनभिहिते कर्तरि कर्मणि च षष्ठी भवति इति वाक्ययोजना। अत्र कर्तृकर्मणोः इत्यत्र इतरेतरयोगद्वन्द्वसमासः अस्ति। तस्य च विग्रहः भवति कर्ता च कर्म च इति कर्तृकर्मणी, तयोः कर्तृकर्मणोः। एवञ्च अस्य अर्थो भवति कर्तरि कर्मणि च। षष्ठी इत्यस्य षष्ठी विभक्तिः इत्यर्थः। कृति इत्यस्य कृदन्तपदवाच्यक्रियायाः इत्यर्थः। अनभिहिते इत्यस्य अनुक्ते इत्यर्थः। ततश्च सूत्रार्थः भवति - कृदन्तपदवाच्यक्रियायाः अनुक्ते कर्तरि षष्ठीविभक्तिः भवति। कृदन्तपदवाच्यक्रियायाः अनुक्ते कर्मणि षष्ठीविभक्तिः भवति।

उदाहरणम् - कृष्णस्य कृतिः। कृष्णः जगतः कर्ता।

सूत्रार्थसमन्वयः -

कृष्णस्य कृतिः। अस्मिन्नुदाहरणे कृतिः इति कृदन्तपदम् अस्ति। तद्वाच्या च करणरूपा क्रिया अस्ति। तस्याः क्रियायाः कर्ता भवति कृष्णः। एवञ्च प्रकृते सः अनुक्तः अस्ति। यतोहि कृतिः इत्यत्र कृधातोः भावे अर्थे क्तिन्प्रत्ययः अस्ति। अतः भावः उक्तः अस्ति। कर्ता च अनुक्तः अस्ति। अपि च कर्तृकरणयोस्तृतीया इति सूत्रेण कर्तरि तृतीया प्राप्ता। ताम् परत्वात् प्रबाध्य कर्तृकर्मणोः कृतिः इति सूत्रेण कृदन्तकृतिपदवाच्यक्रियायाः अनुक्ते कर्तरि कृष्णे षष्ठी विभक्तिः सिध्यति। तेन कृष्णस्य कृतिः इति प्रयोगः सिध्यति।

कृष्णः जगतः कर्ता। अत्र कर्ता इति कृदन्तपदम् अस्ति। तद्वाच्या च करणरूपा क्रिया अस्ति। तस्याः क्रियायाः कर्ता भवति कृष्णः। कर्म अस्ति जगत्। कर्ता इत्यत्र च कृ इति धातोः ण्वुल्तृचौ इति सूत्रेण कर्तरि तृच्प्रत्ययः अस्ति। अतः कर्ता उक्तः अस्ति। कर्म च अनुक्तम् अस्ति। एवञ्च अनुक्ते कर्मणि कर्मणि द्वितीया इति सूत्रेण द्वितीया प्राप्ता अस्ति। ताम् परत्वात् प्रबाध्य कृदन्तकर्तृपदवाच्यक्रियायाः

अनुक्ते कर्मणि जगति कर्तृकर्मणोः कृति इति सूत्रेण षष्ठीविभक्तिः भवति। तेन कृष्णः जगतः कर्ता इति वाक्यं सिध्यति।

अत्रायं विशेषः -

अस्माभिः पूर्वपाठेषु द्विकर्मकधातवः पठिताः सन्ति। यथा कृष्णः ग्रामम् अजां नयति इत्यादिप्रयोगेषु कर्मद्वयं वर्तते। अत्र कृष्णः ग्रामम् अजां नयति इति वाक्यं तु तिङन्तघटितं वर्तते। किन्तु यदा नयति इत्यस्य स्थाने यदि नेता इति कृदन्तस्य प्रयोगः भवति तदा नेता इति कृदन्तयोगे कर्तृकर्मणोः कृति इति सूत्रेण षष्ठीविभक्तिः प्राप्नोति। तत्र नेता इत्यत्र तृच्प्रत्ययः कर्तरि अस्ति। अतः कर्ता तु अभिहितः अस्ति। तेन अभिहिते कर्तरि तु प्रथमा स्यात्। किन्तु कर्म अनभिहितं वर्तते। एवञ्च अस्मिन् वाक्ये कर्मद्वयम् अस्ति। अतः प्रकृते प्रश्नः समुदेति यत् उभयोः कर्मणोः षष्ठी भविष्यति उत एकस्मादेव षष्ठी भविष्यति। तदा अत्र उच्यते मुख्ये कर्मणि तु नित्यं षष्ठी भविष्यति किन्तु गौणे कर्मणि विकल्पेन षष्ठी भविष्यति। तेन कृष्णः ग्रामस्य अजायाः नेता इत्यपि वाक्यं भवति। एवञ्च कृष्णः ग्रामम् अजायाः नेता इत्यपि वाक्यं भवति। एवम् अन्येषामपि द्विकर्मकधातूनां विषये बोध्यम्।

[२३.७] उभयप्राप्तौ कर्मणि॥ (२.३.६६)

सूत्रार्थः - यत्र यत्कृदन्तपदवाच्यक्रियायाः अनुक्ते कर्तरि कर्मणि च युगपत् षष्ठी प्राप्ता तत्र कर्मणि एव षष्ठीविभक्तिः भवति न तु कर्तरि।

सूत्रावतरणम् - कर्तृकर्मणोः कृति इति सूत्रेण अनभिहिते कर्तरि कर्मणि च षष्ठीविभक्तेः विधानं कृतम्। एवञ्च कृष्णेन गवां दोहः इत्यत्र दोह इति कृदन्तशब्दः अस्ति। अपि च दोह इत्यत्र भावे अर्थे घञ्प्रत्ययः अस्ति। ततश्च अत्र कर्ता अपि अनभिहितः कर्म अपि अनभिहितम्। एवञ्च प्रकृते वाक्ये कर्तरि अपि षष्ठी स्यात् कर्मणि अपि स्यात्। तेन कृष्णस्य गवां दोहः इति अनिष्टप्रयोगः आपद्येत। किन्तु कृष्णेन गवां दोहः इत्येव प्रयोगः भवति। परन्तु कथम् एवं भवति इति बोधयितुम् उभयप्राप्तौ कर्मणि इति सूत्रं समागतम्।

सूत्रव्याख्या - इदं नियमसूत्रम्। इदं सूत्रं कर्तृकर्मणोः कृति इति सूत्रं नियामयति। सूत्रेऽस्मिन् द्वे पदे स्तः। उभयप्राप्तौ इति सप्तम्येकवचनान्तं पदम्। कर्मणि इति सप्तम्येकवचनान्तं पदम्। अस्मिन् सूत्रे शेषे षष्ठी इति सूत्रात् षष्ठी (१/१) इति पदम् अनुवर्तते। अनभिहिते (७/१) इति अधिकारः अत्र आगच्छति। उभयप्राप्तौ अनभिहिते कर्मणि षष्ठी भवति इति वाक्ययोजना। अत्र उभयप्राप्तौ इत्यत्र बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः उभयोः प्राप्तिः यस्मिन् कृति इति उभयप्राप्तिः। तस्मिन् उभयप्राप्तौ कृति। एवञ्च अस्यार्थो भवति यत्कृदन्तपदवाच्यक्रियायाः कर्तरि कर्मणि च युगपत्प्राप्तौ। षष्ठी इत्यस्य षष्ठी विभक्तिः इत्यर्थः। अनभिहिते इत्यस्य अनुक्ते इत्यर्थः। ततश्च सूत्रार्थः भवति यत्र यत्कृदन्तपदवाच्यक्रियायाः अनुक्ते कर्तरि कर्मणि च युगपत्षष्ठी प्राप्ता तत्र कर्मणि एव षष्ठीविभक्तिः भवति, न तु कर्तरि।

उदाहरणम् - कृष्णेन गवां दोहः।

सूत्रार्थसमन्वयः -

कृष्णेन गवां दोहः। अत्र दोह इति कृदन्तपदम् अस्ति। तद्वाच्या च दोहनरूपा क्रिया अस्ति। तस्याः क्रियायाः कर्ता भवति कृष्णः। अपि च कर्म भवति गौः। एवञ्च दोह इत्यत्र भावे अर्थे घञ्प्रत्ययः अस्ति। अतः भावः उक्तः अस्ति। कर्ता च अनुक्तः अस्ति। कर्म अपि अनुक्तम् अस्ति। एवञ्च कृदन्तदोहपदवाच्यक्रियायाः अनुक्ते कर्तरि कृष्णे, कर्मणि गवि च युगपत् कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी विभक्तिः प्राप्ता अस्ति। तदा इदं सूत्रम् आगच्छति। एवञ्च अनेन कृतेन नियमेन केवलं कर्मणि एव षष्ठीविभक्तिः भवति। कर्तरि तु षष्ठी न भवति। तदा अनभिहिते कर्तरि कर्तृकरणयोस्तृतीया इति सूत्रेण तृतीया भवति। तेन कृष्णेन गवां दोहः इति वाक्यं सिध्यति। एवमन्येषु उदाहरणेष्वपि समन्वयः बोध्यः।

अयं विशेषः -

उभयप्राप्तौ कर्मणि इति सूत्रेण यः नियमः क्रियते सः नियमः वैकल्पिकः अस्ति। ततश्च यत्र कर्तरि कर्मणि च युगपत् षष्ठीविभक्तिः प्राप्ता अस्ति तत्र उभयत्र षष्ठी कर्तुं शक्यते। केवलं कर्मणि एव वा षष्ठी कर्तुं शक्यते। तेन कृष्णस्य गवां दोहः इत्यपि वक्तुं शक्यते। कृष्णेन गवां दोहः इत्यपि वक्तुं शक्यते।

[२३.८] कृत्यानां कर्तरि वा॥ (२.३.७१)

सूत्रार्थः - कृत्यसंज्ञकप्रत्ययान्तपदवाच्यक्रियायाः अनुक्ते कर्तरि वा षष्ठीविभक्तिः भवति।

सूत्रावतरणम् - कर्तृकर्मणोः कृति इति सूत्रेण अनभिहिते कर्तरि कर्मणि च षष्ठीविभक्तेः विधानं कृतम्। अतः मया सेव्यः हरिः इत्यादौ सेव्य इति कृदन्तप्रयोगे अनभिहिते कर्तरि षष्ठी स्यात्। ततश्च मम सेव्यः हरिः इत्येव प्रयोगः स्यात्। किन्तु मम सेव्यः हरिः, मया सेव्यः हरिः इति उभयविधः प्रयोगः भवति। परन्तु कथम् एवम्भूतः प्रयोगः भवति इति जिज्ञासा भवति। तस्याः शान्त्यर्थं कृत्यानां कर्तरि वा इति सूत्रम् आगच्छति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं विकल्पेन षष्ठीं विदधाति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। कृत्यानाम् इति षष्ठीबहुवचनान्तं पदम्। कर्तरि इति सप्तम्येकवचनान्तं पदम्। वा इति अव्ययपदम्। अस्मिन् सूत्रे शेषे षष्ठी इति सूत्रात् षष्ठी (१/१) इति पदम् अनुवर्तते। अनभिहिते (७/१) इति अधिकारः अत्र आगच्छति। कृत्यानां कर्तरि वा षष्ठी भवति इति वाक्ययोजना। कृत्यानाम् इत्यस्य कृत्यसंज्ञकप्रत्ययान्तपदवाच्यक्रियायाः इत्यर्थः। तस्मात्सूत्रार्थो भवति - कृत्यसंज्ञकप्रत्ययान्तपदवाच्यक्रियायाः अनुक्ते कर्तरि वा षष्ठीविभक्तिः भवति।

उदाहरणम् - मम सेव्यः हरिः, मया सेव्यः हरिः।

सूत्रार्थसमन्वयः -

मम सेव्यः हरिः, मया सेव्यः हरिः। अत्र सेव् इति धातोः ऋहलोर्ण्यत् इति सूत्रेण कर्मणि ण्यत्प्रत्यये कृते सति सेव्य इति शब्दः सिध्यति। तत्र ण्यत्प्रत्ययश्च कृत्यसंज्ञः अस्ति। अतः सेव्यः इति कृत्यसंज्ञकप्रत्ययान्तपदमस्ति। तद्वाच्या च सेवनरूपा क्रिया अस्ति। तस्याः क्रियायाः कर्ता भवति अहम् (शिवः)। कर्म च भवति हरिः। तत्र सेव्य इत्यत्र कर्मणि अर्थे ण्यत्प्रत्ययः अस्ति। अतः कर्म उक्तम् अस्ति।

कर्ता च अनुक्तः अस्ति। एवञ्च अनुक्ते कर्तरि कर्तृकर्मणोः कृति इति सूत्रेण नित्यं षष्ठी प्राप्ता अस्ति। तां प्रबाध्य कृत्यानां कर्तरि वा इति सूत्रेण विकल्पेन षष्ठी भवति। तेन मम सेव्यः हरिः इति प्रयोगः सिध्यति। यदा च षष्ठी नैव भवति, तदभावे कर्तृकरणयोस्तृतीया इति सूत्रेण तृतीया भवति। तेन च मया सेव्यः हरिः इति प्रयोगो भवति।

[२३.१] न लोकाव्ययनिष्ठाखलर्थतृनाम्॥ (२.३.६८)

सूत्रार्थः - लादेशभूतप्रत्ययान्तयोगे उप्रत्ययान्तयोगे उकप्रत्ययान्तयोगे कृदव्यययोगे क्तप्रत्ययान्तयोगे क्तवतुप्रत्ययान्तयोगे खलर्थकप्रत्ययान्तयोगे तृन्प्रत्ययान्तयोगे च अनभिहिते कर्तरि कर्मणि षष्ठी न भवति।

सूत्रावतरणम् - कर्तृकर्मणोः कृति इति सूत्रेण अनभिहिते कर्तरि कर्मणि च षष्ठीविभक्तेः विधानं कृतम्। एवञ्च हरिः सृष्टिं कुर्वन् इत्यत्र कुर्वन् इत्यस्य योगे अनभिहिते सृष्टिरूपे कर्मणि षष्ठी स्यात्। एवञ्च कथमत्र द्वितीया वर्तते। एवमेव विष्णुना हताः दैत्याः इत्यत्र हत इति कृदन्तप्रयोगे अनभिहिते कृष्णरूपे कर्तरि षष्ठी स्यात्। कथमत्र तृतीया वर्तते। इति जिज्ञासा मनसि भवति। तत्प्रशमनाय न लोकाव्ययनिष्ठाखलर्थतृनाम् इति सूत्रं समागतम्।

सूत्रव्याख्या - इदं निषेधसूत्रम्। इदं सूत्रं षष्ठीं निषेधति। सूत्रेऽस्मिन् द्वे पदे स्तः। न इति अव्ययपदम्। लोकाव्ययनिष्ठाखलर्थतृनाम् इति षष्ठीबहुवचनान्तं पदम्। अस्मिन् सूत्रे शेषे षष्ठी इति सूत्रात् षष्ठी (१/१) इति पदम् अनुवर्तते। अनभिहिते (७/१) इति अधिकारः अत्र आगच्छति। अत्र लोकाव्ययनिष्ठाखलर्थतृनाम् इत्यत्र इतरेतरयोगद्वन्द्वसमासः अस्ति। तस्य च विग्रहः भवति - लश्च उश्च उकश्च अव्ययञ्च निष्ठा च खलर्थश्च तृन् च इति लोकाव्ययनिष्ठाखलर्थतृनः। तेषां लोकाव्ययनिष्ठाखलर्थतृनाम्। अत्र लपदेन लादेशभूतौ शतृशानचौ विवक्षितौ। तेन ल इत्यस्यार्थो भवति शतृप्रत्ययान्तः शानच्प्रत्ययान्तश्च। उ इत्यनेन उकारान्तप्रत्ययान्तशब्दाः विवक्षिताः। अव्यय इत्यनेन कृदन्ताव्ययशब्दाः विवक्षिताः। निष्ठा इत्यनेन क्तप्रत्ययान्तशब्दाः क्तवतुप्रत्ययान्तशब्दाः च विवक्षिताः। खलर्थ इत्यनेन खलर्थकप्रत्ययान्तशब्दाः विवक्षिताः। तृन् इत्येन तृन्प्रत्ययान्ताः शानन्प्रत्ययान्ताः चानश् -प्रत्ययान्ताः शतृप्रत्ययान्ताः च विवक्षिताः सन्ति।

सूत्रार्थविचारः - लादेशभूतप्रत्ययान्तयोगे उप्रत्ययान्तयोगे उकप्रत्ययान्तयोगे कृदव्यययोगे क्तप्रत्ययान्तयोगे क्तवतुप्रत्ययान्तयोगे खलर्थकप्रत्ययान्तयोगे तृन्प्रत्ययान्तयोगे च अनभिहिते कर्तरि कर्मणि षष्ठी न भवति।

उदाहरणम् - हरिः सृष्टिं कुर्वन्। हरिः सृष्टिं कुर्वाणः। भक्तः हरिं दिदृक्षुः। हरिः दैत्यान् घातुकः। हरिः संसारं सृष्ट्वा आस्ते। विष्णुना हताः दैत्याः। विष्णुः दैत्यान् हतवान्। हरिणा ईषत्करः प्रपञ्चः। हरिः लोकान् कर्ता। इत्यादीनि सूत्रस्य अस्य उदाहरणानि भवन्ति। अत्र क्रमेण एतेषु उदाहरणेषु सूत्रार्थस्य समन्वयः प्रस्तूयते।

हरिः सृष्टिं कुर्वन्। इदं लादेशभूतशतृप्रत्ययान्तयोगे षष्ठीनिषेधस्य उदाहरणम् अस्ति। तथाहि अत्र कुर्वन् इति शब्दः कृ लट् इति स्थितौ लटः स्थाने कर्तरि अर्थे शतृ इत्यादेशे सति विभक्तिकार्ये कृते सिध्यति। तेन कुर्वन् इति शब्दः लादेशभूतशतृप्रत्ययान्तः अस्ति। एवञ्च हरिः सृष्टिं कुर्वन् इत्यत्र हरिः कर्ता अस्ति, अपि च सृष्टिः कर्म अस्ति। तत्र शतृप्रत्ययः कर्तरि भवतीति कृत्वा कर्ता तु अभिहितः। अतस्तत्र तु प्रथमा जाता। किन्तु कर्म अनभिहितम् अस्ति। अतः अनभिहिते कर्मणि कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी प्राप्ता वर्तते। तस्याः अनेन सूत्रेण निषेधो भवति। ततश्च कर्मणि द्वितीया इति सूत्रेण द्वितीयां विधाय निरुक्तं वाक्यं सिध्यति।

हरिः सृष्टिं कुर्वाणः। इदं लादेशभूतशानच्प्रत्ययान्तयोगे षष्ठीनिषेधस्य उदाहरणम् अस्ति। तथाहि अत्र कुर्वाणः इति शब्दः कृ लट् इति स्थितौ लटः स्थाने कर्तरि अर्थे शानच् इत्यादेशे सति विभक्तिकार्ये कृते सिध्यति। तेन कुर्वाण इति शब्दः लादेशभूतशानच्प्रत्ययान्तः अस्ति। एवञ्च हरिः सृष्टिं कुर्वाणः इत्यत्र हरिः कर्ता अस्ति, अपि च सृष्टिः कर्म अस्ति। तत्र शानच्प्रत्ययः कर्तरि भवतीति कृत्वा कर्ता तु अभिहितः। अतस्तत्र तु प्रथमा जाता। किन्तु कर्म अनभिहितम् अस्ति। अतः अनभिहिते कर्मणि कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी प्राप्ता वर्तते। तस्याः अनेन सूत्रेण निषेधो भवति। ततश्च कर्मणि द्वितीया इति सूत्रेण द्वितीयां विधाय निरुक्तं वाक्यं सिध्यति।

भक्तः हरिं दिदृक्षुः। इदम् उकारान्तप्रत्ययान्तयोगे षष्ठीनिषेधस्य उदाहरणम् अस्ति। तथाहि अत्र दिदृक्षुशब्दः दिदृक्ष इति सन्नन्तधातोः सनाशंसभिक्ष उः इति सूत्रेण उप्रत्यये कृते सति सिध्यति। एवञ्च दिदृक्षुशब्दः उकारान्तप्रत्ययान्तः अस्ति। अस्य च शब्दस्यार्थः अस्ति दर्शनेच्छावान्। अत्र दर्शनेच्छारूपक्रियायाः कर्ता भवति भक्तः, कर्म भवति हरिः। तत्र उप्रत्ययः कर्तरि अस्ति इति कृत्वा कर्ता अभिहितः अतः अभिहिते कर्तरि तु प्रथमा जाता। किन्तु कर्म अनभिहितम्। एवञ्च अनभिहिते कर्मणि कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी प्राप्ता। तस्याः अनेन सूत्रेण निषेधो भवति। ततश्च कर्मणि द्वितीया इति सूत्रेण द्वितीयां विधाय निरुक्तं वाक्यं सिध्यति।

हरिः दैत्यान् घातुकः। इदम् उकप्रत्ययान्तयोगे षष्ठीनिषेधस्य उदाहरणम् अस्ति। तथाहि अत्र घातुकः इत्ययं शब्दः हन् इति धातोः लषपतपदस्थाभूवृषहनकमगमशॄभ्यः उकञ् इति सूत्रेण कर्तरि उकञ्प्रत्यये कृते सिध्यति। ततश्च घातुक इति शब्दः उकप्रत्ययान्तः अस्ति। एतस्यार्थः अस्ति हननकर्ता। तत्र हननक्रियायाः कर्ता अस्ति हरिः, कर्म च अस्ति दैत्यः। तत्र कर्ता उक्तः अस्ति। अतः उक्ते कर्तरि तु प्रथमा जाता। किन्तु कर्म अनुक्तम् अस्ति। एवञ्च अनुक्ते कर्मणि कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी प्राप्ता अस्ति। तस्याः अनेन निषेधो भवति। एवञ्च पारिशेष्यात् कर्मणि द्वितीया इति सूत्रेण अत्र द्वितीया भवति। प्रकृतं वाक्यं च सिध्यति।

हरिः संसारं सृष्ट्वा आस्ते। इदं कृदव्यययोगे षष्ठीनिषेधस्य उदाहरणम् अस्ति। तथाहि अत्र सृष्ट्वा इति शब्दः सृज् इति धातोः क्त्वाप्रत्यये कृते सिध्यति। क्त्वाप्रत्ययान्तशब्दाश्च अव्ययाः भवन्तीति सृष्ट्वाशब्दः कृदव्ययमस्ति। एतस्यार्थः अस्ति सर्जनम्। तत्र सर्जनक्रियायाः कर्ता हरिः अस्ति, कर्म च संसारः अस्ति। तत्र आस्ते इत्यत्र यः तिङ्प्रत्ययः। तेन कर्ता तु अभिहितः अस्ति। अतः अभिहिते कर्तरि तु प्रथमा जाता। किन्तु कर्म अत्र अनभिहितमस्ति। एवञ्च अनुक्ते कर्मणि कर्तृकर्मणोः

कृति इति सूत्रेण षष्ठी प्राप्ता अस्ति। तस्याः अनेन निषेधो भवति। एवञ्च पारिशेष्यात् कर्मणि द्वितीया इति सूत्रेण अत्र द्वितीया भवति। ततश्च हरिः संसारं सृष्ट्वा आस्ते इति निरुक्तः प्रयोगः सिध्यति।

विष्णुना दैत्याः हताः। इदं क्तप्रत्ययान्तयोगे षष्ठीनिषेधस्य उदाहरणम् अस्ति। तथाहि अत्र हत इति शब्दः हन् इति धातोः कर्मणि क्तप्रत्यये कृते सिध्यति। तेन क्तप्रत्ययान्तशब्दः हत इति। अस्यार्थः हननकर्म। अत्र हननक्रियायाः कर्ता भवति विष्णुः, कर्म च भवति दैत्यः। तत्र क्तप्रत्ययेन कर्म अभिहितमस्ति। अतः अभिहिते कर्मणि तु प्रथमा जाता। किन्तु कर्ता तु अनभिहितः अस्ति। एवञ्च अनुक्ते कर्तरि कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी प्राप्ता अस्ति। तस्याः अनेन सूत्रेण निषेधो भवति। एवञ्च पारिशेष्यात् कर्तृकरणयोस्तृतीया इति सूत्रेण अत्र तृतीया भवति। तेन निरुक्तं वाक्यं सिध्यति।

विष्णुः दैत्यान् हतवान्। इदं क्तवतुप्रत्ययान्तयोगे षष्ठीनिषेधस्य उदाहरणम् अस्ति। अत्र हतवान् इति शब्दः हन् इति धातोः कर्तरि क्तवतुप्रत्यये कृते सिध्यति। तेन क्तवतुप्रत्ययान्तशब्दः हतवान् इति। अस्यार्थः अस्ति हननकर्ता। तत्र हननक्रियायाः कर्ता भवति विष्णुः, कर्म च भवति दैत्यः। तत्र क्तवतुप्रत्ययेन कर्ता तु अभिहितः अस्ति। अतः अभिहिते कर्तरि प्रथमा जाता। किन्तु कर्म अनभिहितम् अस्ति। अतः अनुक्ते कर्मणि कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी प्राप्ता अस्ति। तस्याः अनेन निषेधो भवति। एवञ्च पारिशेष्यात् कर्मणि द्विताया इति सूत्रेण अत्र द्वितीया भवति। तेन निरुक्तं वाक्यं सिध्यति।

हरिणा ईषत्करः प्रपञ्चः। इदं खलर्थकप्रत्ययान्तयोगे षष्ठीनिषेधस्य उदाहरणम् अस्ति। तथाहि अत्र ईषत्करः इति शब्दः ईषत्कृ इत्यस्मात् ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल् इति सूत्रेण कर्मणि खल् प्रत्यये कृते सिध्यति। ततश्च ईषत्कर इति शब्दः खलर्थकप्रत्ययान्तः अस्ति। अस्यार्थः अस्ति कृतिमान्। अत्र कृतिरूपक्रियायाः कर्ता भवति हरिः, कर्म भवति प्रपञ्चः। तत्र कर्म अभिहितमस्ति। अतस्तत्र तु प्रथमा जाता। किन्तु कर्ता अनभिहितः अस्ति। एवञ्च अनुक्ते कर्तरि कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी प्राप्ता अस्ति। तस्याः अनेन निषेधो भवति। एवञ्च पारिशेष्यात् कर्तृकरणयोः तृतीया इति सूत्रेण अत्र तृतीया भवति। तेन निरुक्तं वाक्यं सिध्यति।

लोकान् कर्ता हरिः। अत्र कर्तृशब्दः तृन्प्रत्ययान्तः अस्ति। अयं शब्दः हि कृ इति धातोः तृन् इति सूत्रेण कर्तरि तृन्प्रत्यये सति सिध्यति। अस्य च शब्दस्यार्थो भवति उत्पत्तिजनकक्रियावान् इति। अत्र क्रियायाः कर्ता अस्ति हरिः, कर्म अस्ति लोकाः। तत्र तृन्प्रत्ययः कर्तरि अस्ति इत्यतः कर्ता तु अभिहितः अस्ति। तेन अभिहिते कर्तरि तु प्रथमा जाता। किन्तु कर्म अनभिहितं वर्तते। अतः अनभिहिते कर्मणि कर्तृकर्मणोः कृति इति सूत्रेण षष्ठी प्राप्ता। तस्याः अनेन सूत्रेण निषेधः भवति। ततश्च पारिशेष्यात् कर्मणि द्वितीया इति सूत्रेण द्वितीया भवति। तेन च लोकान् कर्ता हरिः इति प्रयोगः सिध्यति।

पाठगतप्रश्नाः-२

अत्र केचन पाठगतप्रश्नाः प्रदीयन्ते।

१०. उभयप्राप्तौ इत्यत्र कः समासः। कश्च विग्रहः।

११. कर्तृकर्मणोः इति पदे कः समासः। कश्च विग्रहः।

१२. लोकाव्ययनिष्ठाखलर्थतृनाम् इत्यत्र कः समासः, कश्च तद्विग्रहः।

१३. न लोकाव्ययनिष्ठाखलर्थतृनाम् इति सूत्रे अव्ययपदेन केषां ग्रहणम्।

१४. कृदन्तयोगे गौणे कर्मणि नित्यं विकल्पेन वा षष्ठी भवति।

अथ सप्तमी कारकविभक्तिः।

[२३.१०] आधारोऽधिकरणम्॥ (१.४.४५)

सूत्रार्थः - कर्तृद्वारा व्यापाराश्रयः कारकसंज्ञः सन् अधिकरणसंज्ञः भवति। कर्मद्वारा फलाश्रयः कारकसंज्ञः सन् अधिकरणसंज्ञः भवति।

सूत्रावतरणम् - संस्कृतभाषायाम् तावत् षट् कारकाणि सन्ति। कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणं चेति। एतेषु अधिकरणं किं भवति इति प्रतिपादयितुम् आधारोऽधिकरणम् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदम् संज्ञासूत्रम्। इदं सूत्रं कारकसंज्ञाम् अधिकरणसंज्ञां च करोति। सूत्रेऽस्मिन् द्वे पदे स्तः। आधारः अधिकरणम् इति पदच्छेदः। तत्र आधारः इति प्रथमैकवचनान्तं पदम्। अधिकरणम् इति प्रथमैकवचनान्तं पदम्। कारके इति अधिकारः अत्र आगच्छति। तस्य च कारकम् इत्यर्थः। आधारः कारकसंज्ञः सन् अधिकरणसंज्ञः भवति इति वाक्ययोजना। अत्र आधारः इति पदस्य आश्रयः इत्यर्थः। एवञ्च सूत्रार्थो भवति - आश्रयः कारकसंज्ञः सन् अधिकरणसंज्ञः भवति। अत्र कस्य आश्रयः अधिकरणसंज्ञः भवति इति चेद् यः कर्तृद्वारा व्यापाराश्रयः, कर्मद्वारा फलाश्रयः सः एव अधिकरणसंज्ञः भवति। एवञ्च निष्कृष्टार्थः भवति - कर्तृद्वारा व्यापाराश्रयः कारकसंज्ञः सन् अधिकरणसंज्ञः भवति। कर्मद्वारा फलाश्रयः कारकसंज्ञः सन् अधिकरणसंज्ञः भवति।

अधिकरणम् औपश्लेषिकम् अभिव्यापकम् वैषयिकम् इति भेदेन त्रिविधम् भवति। आधेयः संयोगादिसम्बन्धेन यस्मिन् अधिकरणे तिष्ठति तदधिकरणम् औपश्लेषिकम् कथ्यते। आधेयः सर्वावयवव्याप्त्या (आधेयः आधारस्य सर्वेषु अवयवेषु तिष्ठति।) यस्मिन् अधिकरणे तिष्ठति तदधिकरणम् अभिव्यापकम् कथ्यते। आधेयः विषयतासम्बन्धेन यस्मिन् अधिकरणे तिष्ठति तदधिकरणम् वैषयिकम् कथ्यते।

उदाहरणम् - चैत्रः कटे शेते। माता स्थाल्यां तण्डुलं पचति। चैत्रः पाकशालायां स्थाल्यां तण्डुलं पचति। तिलेषु तैलम् अस्ति। मोक्षे इच्छा अस्ति।

सूत्रार्थसमन्वयः -

चैत्रः कटे शेते। अत्र वाक्ये कटः अधिकरणम् अस्ति। अतः तत्रैव सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र कर्ता अस्ति चैत्रः। तत्र च शयनरूपः व्यापारः अस्ति। अतः शयनरूपव्यापारस्य साक्षात्

आश्रयः चैत्रः वर्तते। चैत्रस्य च आश्रयः कटः अस्ति। एवञ्च चैत्ररूपकर्तृद्वारा शयनरूपस्य व्यापारस्य आश्रयः कटः अस्ति। एवञ्च कर्तृद्वारा व्यापाराश्रयस्य कटस्य आधारोऽधिकरणम् इति सूत्रेण कारकसंज्ञा भूत्वा अधिकरणसंज्ञा भवति। अत्र आधेयः चैत्रः संयोगसम्बन्धेन कटरूपे अधिकरणे तिष्ठति। अतः इदमधिकरणम् औपश्लेषिकम् भवति।

माता स्थाल्यां तण्डुलं पचति। अत्र वाक्ये स्थाली अधिकरणम् अस्ति। अतः तत्रैव सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र तण्डुलः कर्म अस्ति। तत्र च विक्लित्तिरूपं फलं वर्तते। अतः विक्लित्तिरूपस्य फलस्य आश्रयः तण्डुलः। तण्डुलः च स्थाल्याम् अस्ति। अतः तण्डुलस्य आश्रयः स्थाली वर्तते। एवञ्च तण्डुलरूपकर्मद्वारा विक्लित्तिरूपस्य फलस्य परम्परया आश्रयः स्थाली भवति। एवञ्च कर्मद्वारा फलाश्रयभूतायाः स्थाल्याः आधारोऽधिकरणम् इति सूत्रेण कारकसंज्ञा भूत्वा अधिकरणसंज्ञा भवति। अत्र आधेयः तण्डुलः संयोगसम्बन्धेन स्थालीरूपे अधिकरणे तिष्ठति। अतः इदमधिकरणम् औपश्लेषिकम् भवति।

चैत्रः पाकशालायां स्थाल्यां तण्डुलं पचति। अत्र वाक्ये पाकशाला अधिकरणम् अस्ति। सा च कथम् अधिकरणं भवति इति चेदुच्यते - अत्र वाक्ये चैत्रः कर्ता अस्ति। तस्मिन् च पचनरूपः व्यापारः अस्ति। चैत्रः च पाकशालायाम् वर्तते। अतः चैत्ररूपकर्तृद्वारा पचनरूपस्य व्यापारस्य परम्परया आश्रयः पाकशाला भवति। अतः तस्याः आधारोऽधिकरणम् इति सूत्रेण कारकसंज्ञा भूत्वा अधिकरणसंज्ञा भवति।

एवमेव अत्र वाक्ये स्थाली अधिकरणम् अस्ति। सा च कथम् अधिकरणं भवति इति चेदुच्यते - अत्र वाक्ये तण्डुलः कर्म अस्ति। तस्मिन् च विक्लित्तिरूपं फलं वर्तते। अतः विक्लित्तिरूपस्य फलस्य आश्रयः तण्डुलः अस्ति। तण्डुलः च स्थाल्याम् अस्ति। एवञ्च तण्डुलरूपकर्मद्वारा विक्लित्तिरूपस्य फलस्य परम्परया आश्रयः स्थाली भवति। एवञ्च कर्मद्वारा फलाश्रयभूतायाः स्थाल्याः आधारोऽधिकरणम् इति सूत्रेण कारकसंज्ञा भूत्वा अधिकरणसंज्ञा भवति।

अत्र आधेयः चैत्रः संयोगसम्बन्धेन पाकाशालारूपे अधिकरणे तिष्ठति। अतः इदमधिकरणम् औपश्लेषिकम् भवति। एवञ्च आधेयः तण्डुलः संयोगसम्बन्धेन स्थालीरूपे अधिकरणे तिष्ठति। अतः इदमधिकरणम् औपश्लेषिकम् भवति।

तिलेषु तैलम् अस्ति। अत्र वाक्ये तिलाः अधिकरणम् अस्ति। अतः तत्रैव सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र कर्ता अस्ति तैलम्। तत्र च सत्तारूपः व्यापारः अस्ति। अतः सत्तारूपव्यापारस्य साक्षात् आश्रयः तैलम् वर्तते। तैलस्य च आश्रयः तिलाः सन्ति। एवञ्च तैलरूपकर्तृद्वारा सत्तारूपस्य व्यापारस्य आश्रयः तिलाः सन्ति। एवञ्च कर्तृद्वारा व्यापाराश्रयभूतानां तिलानाम् आधारोऽधिकरणम् इति सूत्रेण कारकसंज्ञा भूत्वा अधिकरणसंज्ञा भवति। अत्र आधेयम् तैलम् तिलानां सर्वेषु अवयवेषु वर्तते। अतः तिलरूपमधिकरणम् अभिव्यापकम् भवति।

मोक्षे इच्छा अस्ति। अत्र वाक्ये मोक्षः अधिकरणम् अस्ति। अतः तत्रैव सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र कर्त्री अस्ति इच्छा। तत्र च सत्तारूपः व्यापारः अस्ति। अतः सत्तारूपव्यापारस्य साक्षात् आश्रयः इच्छा वर्तते। तत्र इच्छा समवायसम्बन्धेन इच्छावति पुरुषे तिष्ठति। तथैव यद्विषयिणी

इच्छा भवति तस्मिन् विषये इच्छा विषयतासम्बन्धेन तिष्ठति। प्रकृते च मोक्षविषयिणी इच्छा अस्ति। अतः विषयतासम्बन्धेन इच्छायाः आश्रयः मोक्षः वर्तते। एवञ्च इच्छारूपकर्तृद्वारा सत्तारूपस्य व्यापारस्य आश्रयः मोक्षः अस्ति। एवञ्च कर्तृद्वारा व्यापाराश्रयस्य मोक्षस्य आधारोऽधिकरणम् इति सूत्रेण कारकसंज्ञा भूत्वा अधिकरणसंज्ञा भवति। अत्र आधेया इच्छा विषयतासम्बन्धेन मोक्षे वर्तते। अतः मोक्षरूपमधिकरणम् वैषयिकम् भवति।

[२३.११] सप्तम्यधिकरणे च॥ (२.३.३६)

सूत्रार्थः - अनुक्ते अधिकरणे सप्तमी विभक्तिः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं सप्तमीं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। अधिकरणे इति सप्तम्येकवचनान्तं पदम्। सप्तमी इति प्रथमैकवचनान्तं पदम्। अनभिहिते इति अधिकारः अत्र आगच्छति। अनभिहिते अधिकरणे सप्तमी विभक्तिः भवति इति वाक्ययोजना। सप्तमी इत्यस्य सप्तमी विभक्तिः इत्यर्थः। अनभिहिते इत्यस्य अनुक्ते इत्यर्थः। तेन च सूत्रार्थः भवति - अनुक्ते अधिकरणे सप्तमी विभक्तिः भवति।

उदाहरणम् - तैलं तिलेषु अस्ति। चैत्रः कटे शेते। इच्छा मोक्षे अस्ति।

सूत्रार्थसमन्वयः -

चैत्रः कटे शेते। अस्मिन् वाक्ये कटः अधिकरणम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अत्र तिङ् कर्तरि प्रयुक्तः अस्ति। अतः कर्ता उक्तः भवति, अधिकरणम् च अनुक्तं भवति। एवञ्च अनुक्ते अधिकरणे कटे सप्तम्यधिकरणे च इति सूत्रेण सप्तमी विभक्तिः भवति।

तैलं तिलेषु अस्ति। अस्मिन् वाक्ये तिलम् अधिकरणम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अत्र तिङ् कर्तरि प्रयुक्तः अस्ति। अतः कर्ता उक्तः भवति, अधिकरणम् च अनुक्तं भवति। एवञ्च अनुक्ते अधिकरणे तिले सप्तम्यधिकरणे च इति सूत्रेण सप्तमी विभक्तिः भवति।

इच्छा मोक्षे अस्ति। अस्मिन् वाक्ये मोक्षः अधिकरणम् अस्ति। तत् च अनुक्तम् अस्ति। यतोहि अत्र तिङ् कर्तरि प्रयुक्तः अस्ति। अतः कर्ता उक्तः भवति, अधिकरणम् च अनुक्तं भवति। एवञ्च अनुक्ते अधिकरणे मोक्षे सप्तम्यधिकरणे च इति सूत्रेण सप्तमी विभक्तिः भवति।

पाठगतप्रश्नाः-३

अत्र केचन पाठगतप्रश्नाः प्रदीयन्ते।

१५. आधारोऽधिकरणम् इति सूत्रं किं करोति।

१६. अधिकरणम् कतिविधम्।

१७. किम् औपश्लेषिकम् अधिकरणम्।

१८. तिलेषु तैलमस्ति इति उदाहरणे कीदृशमधिकरमस्ति।

1) औपश्लेषिकम् 2) वैषयिकम् 3) अभिव्यापकम् 4) समवायि

१९. तिलेषु तैलमस्ति इत्यत्र केन सूत्रेण सप्तमी विहिता।

पाठसारः

अत्र पाठे अपादानसंज्ञाविधायकानां ध्रुवमपायेऽपादानम्, भीत्रार्थानां भयहेतुः, जनिकर्तुः प्रकृतिः, आख्यातोपयोगे इति सूत्राणां व्याख्या वर्तते। ततः परम् अपादाने पञ्चमीविधायकस्य सूत्रस्य अपादाने पञ्चमी इत्यस्य व्याख्या वर्तते।

एवञ्च ततः परम् कारकषष्ठीविभक्तेः वर्णनं वर्तते। तत्र कारकषष्ठीविधायकस्य कर्तृकर्मणोः कृति इति सूत्रस्य सोदाहरणं व्याख्या अत्र अस्ति। पुनः कर्तृकर्मणोः कृति इति सूत्रस्य नियामकं सूत्रं भवति उभयप्राप्तौ कर्मणि। तस्य व्याख्यानम् अत्र वर्तते। एवं कृत्यानां कर्तरि वा इति सूत्रस्य सोदाहरणं व्याख्या अस्ति। पुनः कर्तृकर्मणोः कृति इत्यस्य निषेधकस्य न लोकाव्ययनिष्ठाखलर्थतृनाम् इति सूत्रस्य च अत्र व्याख्या वर्तते।

ततः परम् अस्मिन् पाठे अधिकरणसंज्ञाविधायकस्य आधारोऽधिकरणम् इति सूत्रस्य व्याख्या वर्तते। पुनः सप्तमीविधायकस्य सप्तम्यधिकरणे च इति सूत्रस्य सोदाहरणं व्याख्या वर्तते।

पाठान्तप्रश्नाः

१. ध्रुवमपायेऽपादानम् इति सूत्रस्य व्याख्या विधेया।

२. भीत्रार्थानां भयहेतुः इति सूत्रस्य व्याख्यां लिखन्तु।

३. जनिकर्तुः प्रकृतिः इति सूत्रस्य व्याख्यां लिखत।

४. आख्यातोपयोगे इति सूत्रस्य व्याख्यां कुरुत।

५. अपादाने पञ्चमी इति सूत्रस्य व्याख्यां कुरुत।

६. पत्रं वृक्षात् पतति, माणवकः गुरोः वेदं पठति इत्युभयोः प्रयोगयोः सिद्धिः लेख्या।

७. सर्पः नकुलात् बिभेति, माता बालं सर्पात् रक्षति इत्युभयोः प्रयोगयोः सिद्धिः लेख्या।

८. कर्तृकर्मणोः कृति इति सूत्रस्य व्याख्यानं कुर्वन्तु।

९. उभयप्राप्तौ कर्मणि इति सूत्रस्य व्याख्यानं कुर्वन्तु।

१०. कृत्यानां कर्तरि वा इति सूत्रस्य व्याख्यानं कुर्वन्तु।

११. न लोकाव्ययनिष्ठाखलर्थतृनाम् इति सूत्रस्य व्याख्यानं कुर्वन्तु।

१२. कृष्णस्य कृतिः इति प्रयोगं साधयन्तु।

१३. संसारस्य कर्ता कृष्णः इति प्रयोगं साधयन्तु।

१४. मम सेव्यः हरिः, मया सेव्यः हरिः इत्यनयोः प्रयोगयोः सिद्धिं लिखन्तु।

१५. विष्णुना हताः दैत्याः इत्यत्र कर्तरि षष्ठी कथं नेति प्रतिपादयन्तु।

१६. हरिः सृष्टिं कुर्वन् इति प्रयोगस्य सिद्धिं लिखत।

१७. दैत्यान् घातुकः हरिः इति प्रयोगं साधयन्तु।

१८. सप्तम्यधिकरणे च इति सूत्रस्य व्याख्या लेख्या।

१९. चैत्रः पाकशालायां स्थाल्यां तण्डुलं पचति इति प्रयोगस्य सिद्धिः कार्या।

२०. अधिकरणभेदान् सोदाहरणम् उपस्थापयत।

पाठगतप्रश्नानाम् उत्तराणि

अत्र पूर्वोक्तानां प्रश्नानाम् उत्तराणि प्रदीयन्ते।

उत्तराणि-१

१. ध्रुवम् इत्यस्य धात्ववाच्यविभागाश्रयः इत्यर्थः।

२. अपायः इत्यस्य विभागः इत्यर्थः।

३. ध्रुवमपायेऽपादानम् इति सूत्रेण अपादानसंज्ञा विधीयते।

४. भयहेतुः इति पदस्य भयकारणम् इत्यर्थः।

५. भयहेतुः इति पदे भयस्य हेतुः इति षष्ठीतत्पुरुषसमासः।

६. जनिकर्तुः इति पदस्य जायमानस्य इति अर्थः।

७. प्रकृतिः इति पदस्य कारणम् इति अर्थः।

८. आख्याता इति पदस्य वक्ता इति अर्थः।

९. उपयोगः हि नियमपूर्वकविद्यास्वीकारः।

उत्तराणि-२

१०. उभयप्राप्तौ इत्यत्र बहुव्रीहिसमासः। उभयोः प्राप्तिः यस्मिन् इति च अस्य विग्रहः।

११. कर्तृकर्मणोः इति पदे इतरेतरयोगद्वन्द्वसमासः। कर्ता च कर्म च इति कर्तृकर्मणी। इति विग्रहः। तयोः कर्तृकर्मणोः इति।

१२. लोकाव्ययनिष्ठाखलर्थतृनाम् इत्यत्र इतरेतरयोगद्वन्द्वसमासः। लोकाव्ययनिष्ठाखलर्थतृनाम् इत्यस्य विग्रहः भवति लश्च उश्च उकश्च अव्ययश्च निष्ठा च खलर्थश्च तृन् च इति लोकाव्ययनिष्ठाखलर्थतृनः। तेषां लोकाव्ययनिष्ठाखलर्थतृनाम्।

१३. न लोकाव्ययनिष्ठाखलर्थतृनाम् इति सूत्रे अव्ययपदेन कृदव्ययानामेव ग्रहणम्।

१४. कृदन्तयोगे गौणे कर्मणि विकल्पेन षष्ठी भवति।

उत्तराणि-३

१५. आधारोऽधिकरणम् इति सूत्रम् अधिकरणसंज्ञां करोति।

१६. औपश्लेषिकम् अभिव्यापकम् वैषयिकम् इति भेदेन अधिकरणम् त्रिविधम् भवति।

१७. आधेयः संयोगादिसम्बन्धेन यस्मिन् अधिकरणे तिष्ठति तदधिकरणम् औपश्लेषिकम् कथ्यते।

१८. ३

१९. सप्तम्यधिकरणे च।

।।इति त्रयोविंशः पाठः।।